# Mantravarnayuta Shri Ramashtottarashatanamavali 9

# મન્ત્રવર્ણયુત શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ૯

## Document Information


Text title : rAmAShTottarashatanAmAvalI 9

File name : rAmAShTottarashatanAmAvalI9.itx

Category : raama, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_raama

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Latest update : April 19, 2019

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# મન્ત્રવર્ણયુત શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ૯

ૐ શ્રીમત્સૂર્યકુલામ્બોધિવર્ધનીયકલાનિધયે નમઃ ।
ૐ શ્રીમદ્બ્રહ્મેન્દ્રરુદ્રાદિવન્દનીય જગદ્ગુરવે નમઃ ।
ૐ શ્રીમત્સૌભાગ્યસૌન્દર્યલાવણ્યામ્બુધિપઙ્કજાય નમઃ ।
ૐ શ્રીમચ્ચિન્તામણીપીઠસ્વર્ણસિંહાસનેશ્વરાય નમઃ ।
ૐ શ્રીમદ્રાજાધિરાજેન્દ્રમકુટાઙ્કિતપાદુકાય નમઃ ।
ૐ શ્રીમદ્ધિમાદ્રિરાજેન્દ્રકન્યાધ્યેયપદામ્બુજાય નમઃ ।
ૐ શ્રીમત્સૃષ્ટ્યાદિવિવિધકાર્યકારણમૂર્તિમતે નમઃ ।
ૐ શ્રીમદમ્લાનતુલસીવનમાલાવિરાજિતાય નમઃ ।
ૐ શ્રીમત્સુરાસુરારાધ્યપાદપદ્મવિરાજિતાય નમઃ ।
ૐ શ્રીજગન્મોહનાકારદિવ્યલાવણ્યવિગ્રહાય નમઃ । ૧૦
ૐ શ્રીશૃઙ્ગારરસામ્ભોધિપ્રોદ્યત્પૂર્ણસુધાકરાય નમઃ ।
ૐ શ્રીકણ્ઠકરકોદણ્ડપરીક્ષિતપરાક્રમાય નમઃ ।
ૐ શ્રીવત્સલાઞ્છનાત્યન્તમણિભૂષણભૂષિતાય નમઃ ।
ૐ શ્રીભૂનીલાઙ્ગનાસઙ્ગપુલકાઙ્કિતવિગ્રહાય નમઃ ।
ૐ શ્રીસામ્બદેવહૃત્પદ્મવિકાસનદિવાકરાય નમઃ ।
ૐ શ્રીક્ષીરવાર્ધિપર્યઙ્કવિહારાત્યન્તબાલકાય નમઃ ।
ૐ શ્રીકરાકારકોદણ્ડકાણ્ડોપેતકરામ્બુજાય નમઃ ।
ૐ શ્રીજાનકીમુખામ્ભોજમણ્ડનીયપ્રભાકરાય નમઃ ।
ૐ રામાજનમનોહારીદિવ્યકન્દર્પવિગ્રહાય નમઃ ।
ૐ રમામનોજ્ઞવક્ષોજદિવ્યગન્ધસુવાસિતાય નમઃ । ૨૦
ૐ રમાવક્ષોજકસ્તૂરિવાસનાસ્વાદલોલુપાય નમઃ ।
ૐ રાજાધિરાજરાજેન્દ્રરમણીયગુણાકરાય નમઃ ।
ૐ રાવણાદિવધોદ્યુક્તવિજૃમ્ભિતપરાક્રમાય નમઃ ।
ૐ રાકેન્દ્રરાગ્નિવિમલનેત્રત્રયવિભૂષિતાય નમઃ ।
ૐ રાત્રિઞ્ચરૌઘમત્તેભનિર્ભેદનમૃગેશ્વરાય નમઃ ।

ૐ રાજત્સૌદામિનીતુલ્યદિવ્યકોદણ્ડમણ્ડનાય નમઃ ।
ૐ રાક્ષસેશ્વરસંસેવ્યદિવ્યશ્રીપાદપઙ્કજાય નમઃ ।
ૐ રાકેન્દુકુલસમ્ભૂતરમણીપ્રાણનાયકાય નમઃ ।
ૐ રત્નનિર્મિતભૂષાર્યચરણામ્બુજશોભિતાય નમઃ ।
ૐ રાઘવાન્વયસઞ્જાતનૃપશ્રેણીશિરોમણયે નમઃ । ૩૦
ૐ રાકાશશિસમાકારવક્ત્રમણ્ડલમણ્ડિતાય નમઃ ।
ૐ રાવણાસુરકાસારચણ્ડભાનુશરોત્તમાય નમઃ ।
ૐ રણત્સઙ્ગીતસમ્પૂર્ણસહસ્રસ્તમ્ભમણ્ડપાય નમઃ ।
ૐ રત્નમણ્ડપમધ્યસ્થસુન્દરીજનવેષ્ટિતાય નમઃ ।
ૐ રણત્કિઙ્કિણિસંશોધિમણ્ડલીકૃતકાર્મુકાય નમઃ ।
ૐ રત્નૌઘકાન્તિવિલસદ્ડોલાખેલનશીલનાય નમઃ ।
ૐ માણિક્યોજ્જ્વલસન્દીપ્તકુણ્ડલદ્વયમણ્ડિતાય નમઃ ।
ૐ માનિનીજનમધ્યસ્થસૌન્દર્યાતિશયાશ્રયાય નમઃ ।
ૐ મન્દસ્મિતાનનામ્ભોજમોહિતાનેકતાપસાય નમઃ ।
ૐ માયામારીચસંહારકારણાનન્દવિગ્રહાય નમઃ । ૪૦
ૐ મકરાક્ષાદિદુસ્સાધ્યદુષ્ટદર્પાપહારકાય નમઃ ।
ૐ માધન્મધુવ્રતવ્રાતવિલસત્કેશસંવૃતાય નમઃ ।
ૐ મનોબુદ્ધીન્દ્રિયપ્રાણવાગાદીનાંવિલક્ષણાય નમઃ ।
ૐ મનસ્સજકલ્પમાત્રેણનિર્મિતાજાણ્ડકોટિકાય નમઃ ।
ૐ મારુતાત્મજસંસેવ્યદિવ્યશ્રીચરણામ્બુજાય નમઃ ।
ૐ માયામાનુષવેષેણમાયિકાસુરખણ્ડનાય નમઃ ।
ૐ માર્તાણ્ડકોટિજ્વલિતમકરાકારકુણ્ડલાય નમઃ ।
ૐ માલતીતુલસીમાલ્યવાસિતાખિલવિગ્રહાય નમઃ ।
ૐ મારકોટિપ્રતીકાશમહદદ્ભુતદેહભૃતે નમઃ ।
ૐ મહનીયદયાવેશકલિતાપાઙ્ગલોચનાય નમઃ । ૫૦
ૐ મકરન્દરસાસ્વાદ્યમાધુર્યગુણભૂષણાય નમઃ ।
ૐ મહાદેવસમારાધ્યમણિનિર્મિતપાદુકાય નમઃ ।
ૐ મહામાણિક્યખચિતાખણ્ડતૂણીધનુર્ધરાય નમઃ ।
ૐ મન્દરોદ્ભૂતદુગ્ધાબ્ધિબિન્દુપુઞ્જવિભૂષણાય નમઃ ।
ૐ યક્ષકિન્નરગન્ધર્વસ્તૂયમાનપરાક્રમાય નમઃ ।
ૐ યજમાનજનાનન્દસન્ધાનચતુરોદ્યમાય નમઃ ॥ ।
ૐ યમાદ્યષ્ટાઙ્ગશીલાદિયમિહૃત્પદ્મગોચરાય નમઃ ।

ॐ યશોદાહૃદયાનન્દસિન્ધુપૂર્ણસુધાકરાય નમઃ ।
ॐ યાજ્ઞ્યવલ્ક્યાદિઋષિભિસ્સંસેવિતપદદ્વયાય નમઃ ।
ॐ યમલાર્જુનપાપૌઘપરિહારપદામ્બુજાય નમઃ । ૬૦
ॐ યાકિનીકુલસમ્ભૂતપીડાજાલાપહારકાય નમઃ ।
ॐ યાદઃપતિપયઃક્ષોભકારિબાણશરાસનાય નમઃ ।
ॐ યામિનીપદ્મિનીનાથકૃતશ્રીકર્ણકુણ્ડલાય નમઃ ।
ॐ યાતુધાનાગ્રણીભૂતવિભીષણવરપ્રદાય નમઃ ।
ॐ યાગપાવકસઞ્જાતદ્રૌપદીમાનરક્ષકાય નમઃ ।
ॐ યક્ષરક્ષશ્શિક્ષણાર્થમુદ્યદ્ભીષણસાયકાય નમઃ ।
ॐ યામાર્ધેનદશગ્રીવસૈન્યનિર્મૂલનાસ્ત્રવિદે નમઃ ।
ॐ યજનાનન્દસન્દોહમન્દસ્મિતમુખામ્બુજાય નમઃ ।
ॐ યામલાગમવેદૈકસ્તૂયમાનયશોધનાય નમઃ ।
ॐ યાકિનીસાકિનીસ્થાનષડાધારામ્ભુજાશ્રયાય નમઃ । ૭૦
ॐ યતીન્દ્રવૃન્દસંસેવ્યમાનાખણ્ડપ્રભાકરાય નમઃ ।
ॐ યથોચિતાન્તર્યાગાદિપૂજનીયમહેશ્વરાય નમઃ ।
ॐ નાનાવેદાદિવેદાન્તૈઃ પ્રશંસિતનિજાકૃતયે નમઃ ।
ॐ નારદાદિમુનિપ્રેમાનન્દસન્દોહવર્ધનાય નમઃ ।
ॐ નાગરાજાઙ્કુપર્યઙ્કશાયિસુન્દરવિગ્રહાય નમઃ ।
ॐ નાગારિમણિસઙ્કાશદેહકાન્તિવિરાજિતાય નમઃ ।
ॐ નાગેન્દ્રફણિસોપાનનૃત્યલીલાવિશારદાય નમઃ ।
ॐ નમદ્ગીર્વાણમકુટમણિરઞ્જિતપાદુકાય નમઃ ।
ॐ નાગેન્દ્રભૂષણપ્રેમાતિશયપ્રાણવલ્લભાય નમઃ ।
ॐ નાનાપ્રસૂનવિલસદ્વનમાલાવિરાજિતાય નમઃ । ૮૦
ॐ નવરત્નાવલીશોભિતાપાદતલમસ્તકાય નમઃ ।
ॐ નવમલ્લીપ્રસૂનાભિશોભમાનશિરોરુહાય નમઃ ।
ॐ નલિનીશઙ્ખચક્રાસિગદાશાર્ઙ્ગેષુખેટધૃતે નમઃ ।
ॐ નાદાનુસન્ધાનપરૈરવલોક્યનિજાકૃતયે નમઃ ।
ॐ નરામરાસુરવ્રાતકૃતપૂજોપહારકાય નમઃ ।
ॐ નખકોટિપ્રભાજાલવ્યાપ્ત બ્રહ્માણ્ડમણ્ડલાય નમઃ ।
ॐ નતશ્રીકરસૌન્દર્યકરુણાપાઙ્ગવીક્ષણાય નમઃ ।
ॐ નવદૂર્વાદલશ્યામશૃઙ્ગારકારવિગ્રહાય નમઃ ।
ॐ નરકાસુરદોર્દર્પશૌર્યનિર્વાપણક્ષમાય નમઃ ।

ૐ નાનાપ્રપઞ્ચવૈચિત્ર્યનિર્માણાત્યન્તપણ્ડિતાય નમઃ । ૯૦
ૐ માધ્યાહ્ન્યાર્કપ્રભાજાલપુઞ્જકિઞ્જલ્કસન્નિભાય નમઃ ।
ૐ મનુવંશ્યકિરીટાગ્રશોભમાનશિરોમણયે નમઃ ।
ૐ મલયાચલસમ્ભૂતદિવ્યચન્દનચર્ચિતાય નમઃ ।
ૐ મન્દરાધારકમઠાકારકારણવિગ્રહાય નમઃ ।
ૐ મહદાદિપ્રપઞ્ચાન્તર્વ્યાપ્તવ્યાપારવિગ્રહાય નમઃ ।
ૐ મહામાયાસમાવેશિતાણ્ડકોટિગણેશ્વરાય નમઃ ।
ૐ મરામરેતિસઞ્જપ્યમાનમૌનીશ્વરપ્રિયાય નમઃ ।
ૐ મહત્સગુણરૂપૈકવ્યક્તીકૃતનિરાકૃતયે નમઃ ।
ૐ મત્સ્યકચ્છપવારાહનૃસિંહાદ્યવતારકાય નમઃ ।
ૐ મન્ત્રમન્ત્રાર્થમન્ત્રાઙ્ગમન્ત્રશાસ્ત્રવિશારદાય નમઃ । ૧૦૦
ૐ મત્તેભવક્ત્ર ષડ્વક્ત્ર પ્રપઞ્ચવક્ત્રૈસ્સુપૂજિતાય નમઃ ।
ૐ માયાકલ્પિતવિધ્યણ્ડમણ્ટપાન્તર્બહિસ્થિતાય નમઃ ।
ૐ મનોન્મન્યચલેન્દ્રોર્ધ્વશિખરસ્થદિવાકરાય નમઃ ।
ૐ મહેન્દ્રસામ્રાજ્યફલસન્ધાનાપ્તત્રિવિક્રમાય નમઃ ।
ૐ માતૃકામણ્ડલવ્યાપ્તકૃતાવરણમધ્યગાય નમઃ ।
ૐ મનોહરમહાનીલમેઘશ્યામવપુર્ધરાય નમઃ ।
ૐ મધ્યકાલાન્ત્યકાલાદિકાલભેદવિવર્જિતાય નમઃ ।
ૐ મહાસામ્રાજ્યપટ્ટાભિષેકોત્સુકહૃદામ્બુજાય નમઃ । ૧૦૮

ઇતિ મન્ત્રવર્ણયુત શ્રીરામાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

Encoded and proofread by lalitha parameswari parameswari.lalitha at gmail.com

*Mantravarnayuta Shri Ramashtottarashatanamavali 9*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*